रणमित्यबाधितस्यविपाककालाभिःप्रसक्तःसचापनीतइतिनचानेकंकर्मानेकजन्मकारणं॥कस्मा
तदेवंजन्मयुगपल्लभतेक्रमेणैववाच्यं तथाचपूर्वदोषानुषंगः॥तस्माज्जन्मप्रयाणांतरेकृतःपु
ण्यापुण्यकर्माशयप्रचयोविचित्रःप्रधानोप्रसजनभावेनावस्थितःप्रायणाभिव्यक्तःएकप्र
धानमरणंप्रसाध्य संमूर्छितएकमेवजन्मकरोति॥तज्जन्मतेनैवकर्मणालब्धायुष्कंभवति॥त
स्मिन्नायुषितेनैवकर्मणाभोगःसंपद्यतइति असौकर्माशयोजन्मायुर्भोगहेतुत्वात्त्रिविधो
ऽभिधीयतइति अतएवाधिकःकर्माशयउक्तइति दृष्टजन्मवेदनीयस्त्वेकविपाकारंभिणो
गहेनुत्वात् द्विविपाकारंभीवाभोगापूर्हेतुत्वात् त्रिविपाकारंभीवा जन्मभोगायुर्हेतु
त्वात् नंदीश्वरवत्॥ नहुषवच्च॥ क्लेशकर्मविपाकानुभवनिर्वर्तिताभिस्तुवासनाभिरना

दिकालसंमूर्छितमिदंचित्रंविचित्रंकर्मचसर्वमस्यजालंव्याप्तिभिर्विततं स्यात्। अनेकभवपू
र्वविकारवासनाप्रसूतंस्वयंकर्मविपाकोदयक्षणएवैकमविपाकोदयंकरोतियेसंस्काराःस्मृतिहेतवस्तावासनास्ता
श्चानादिकालीनाइतियस्तस्यैवैकभविकःकर्माशयःसनियतविपाकश्चानियतविपाकश्च। तत्रदृष्ट
जन्मवेदनीयस्यनियतविपाकस्यैवायनियमोनुत्पन्नेदृष्टजन्मवेदनीयस्यानियतविपाकस्याकस्मात्
योस्यदृष्टजन्मवेदनीयोनियतविपाकस्तस्यत्रयीगतिःकृतस्याविपक्वस्यविनाशःप्रधानकर्मण्य
पायेगमनंवानियतविपाकप्रधानकर्मप्रसूतस्यनावरमवस्थानमिति। तत्रकृतस्याविपक्वस्याना
श्रोषधाशुल्लकर्मादयादिहेवनाशः कृष्णस्ययत्रेदमुक्तं। द्वेद्वेवैकर्मणीवेदितव्येपापस्यैकोरा
शिःपुण्यकृतोपहंति। तदिष्टस्वकर्मणिसुकृतानिकुर्महेवतेकर्मविपाकवेदयंते। प्रधानक
र्मण्यापगमनं। यत्रेदमुक्तं स्वल्पःसंकरःसपरिहारःसमलवमर्षःप्रधानस्यनापकर्षयितुं
कस्मात् कुशलंहिमेबहुन्यदस्तियत्रायमाद्यपंगतःस्वर्गेष्वपकर्षमूलंकरिष्यतीति। नियत
विपाकप्रधानकर्मणाभिभूतस्यवानिचिरमवास्थानंकथमिति अदृष्टजन्मवेदनीयस्य

DR. BHAU DAJI

नियतविपाकस्यैवकर्मणःसमावंमरणमभिव्यक्तेःकारणमुक्तं। नत्वदृष्टवेदनीयस्यानियतविपाकस्य जन्म१
यत्तदृष्टजन्मवेदनीयंकर्मनियतविपाकंतन्नश्येदनुपायपंगतंवत्। अभिभूतंह्यचिरमप्युपस्थितंप्र
वत्समापन्नंकर्माभिव्यंजकंनिमित्तस्यनविपाकाभिमुखंकरोतीति। नहिपाकस्यैकरूपंकालनिमि
त्तानवधारणात्। इयंकर्मगतिस्त्रिप्रकारुविहोनान्येति। नचोत्सर्गस्यापवादान्निवृत्तिरेकभविकःक
र्माशियोनुज्ञायतइति॥२३॥ उक्तंलक्षणंकर्मणःकर्ममूलंत्वंचविपाकानांविपाकाःकस्य
मूलंयेनामीत्यक्तव्याइत्यतआह। तेत्वादपरिस्रावफलाःपुण्यापुण्यहेतुत्वात्॥२४॥तेजन्मायु
र्भोगाःपुण्यहेतुकाःसुखफलाअपुण्यहेतुकाःदुःखफलाइति॥२४॥यद्यापेक्षदुःखंप्रतिकू
लात्मकं एवंविषयसुखकालेपिदुःखमेवप्रतिकूलात्मकंयोगिनः। कथंबहुयप्यतेः॥२५॥
परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंविवेकिनः। सर्वस्यायंरागानुविधश्चेत्त
नाचेतनस्तथानाधीनःसुखानुभवतिं तत्रास्तिरागजःकर्माशयः तथाचद्वेष्टिदुःखसा
धनानीमुह्यतिचेतिद्वेषमोहकृतोप्यस्तिकर्माशयः। तथाचोक्तं। नानुपहत्यभूतानु

यौ भोगः संभवतीति हिंसा कृतो व्यक्तिकर्मशयइति विषयसुखं चाविद्येत्युक्तं यावद्योगाधिष्ठियाणां
तत्तदुपशान्तिस्तत्सुखं यावदनुपशान्तिस्तदुःखं नचेद्विद्याणां भोगाभ्यासेनवैतृष्ण्यकर्तृ
शक्तं कस्मात् यतोभोगाभ्यासमनुविवर्धन्तेरागाः कौशलानिचेद्विद्याण्यभिनिवेशस्तस्मादनुपायः
सुखस्यभोगाभ्यासइति सर्वत्रायं वृश्चिकभयभीतइवाशीविषेणदष्टोयः सुखाभिषङ्गा
नुधावितोमहतिदुःखपंकनिमग्नइति एवंपरिणामदुःखतारतम्यदर्शनानुविधश्चयत्नात्रेय
तनसाधनाधीनस्वरूपानुपपत्तिः॥ तत्रानिष्टेषंजः कर्मशयः सुखसाधनानिप्रार्थयमानः
कायेनवाचामनसाचपरिस्पन्दतेतनःपरमनुग्रहात्युपहन्तुंचेतिपरानुग्रहपिडाध्यार्थ
र्मविपाकेनिमित्तकर्मशयोलोभान्मोहाच्चभवतीत्येषादुःखतोव्यक्तेकापुनःसंस्का
रदुःखतासुखानुभवानसुखसंस्काराश्चयोदुःखानुभवादपिदुःखसंस्काराश्चयंयाति। एवंकर्म
ण्याविपाकेअनुभूयमानेसुखंदुःखंवापुनः कर्मशयमुपचिनोति। एवमिदमनादिदुःखस्रोतोवि
प्रसृतंयोगिनमेवप्रतिकूलत्वाद्बाधतेकस्मात्अधिपात्रकल्पेयमिनमेनमेवप्रतिपद्यते

हिविद्वानिति यथोर्णानंतुरधिपात्रेन्यस्तःस्पर्शेनदुःखयतिनान्येषुगात्रावयवेषुएवमेतानिदुःखा
निअधिपात्रकल्पंयोगिनमेवलिश्नंतिनेतरंप्रतिपत्तारं। इत्तरंतुस्वकर्मोपकल्पंदुःखमनुपादत्सजं
तंत्यक्तुमुपाददानंअनादिवासनाविचित्रयाचितत्वात्सुखमतानुविधमियामिच्यादृष्टव्यथा
हंकारममकारानुपातंजातंजातंवास्मिकोभयानिमित्तोक्लिश्नातिस्तोपजनुत्सृजंते। तदेवमनादि
दुःखस्रोतसा दुःखमात्मात्मनंभूतग्रामंचदृष्ट्वायोगीसर्वदुःखक्षयकारणंसम्यग्दर्शनंशरणंप्रपद्यतइति
गुणवृत्तिविरोधाद्दुःखमेवसर्वंविवेकिनः। अस्मात्प्रवृत्तिस्थितिरूपाबुद्धिगुणाः परस्परानुग्रहंत
न्त्रीभूत्वाशांतंघोरंमूढंवात्मशयंत्रिगुणमेवारभंतेचलंचगुणवृत्तमिति। क्षिप्तपरिणामीचित्तमुक्तं
रूपातिशयावृत्तिशयाश्रयपरस्परोपाश्रयेणविरोधैतंते। सामान्यानित्यतिशयेसहभवंतितएवमेतेगुणा
इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्ययावृत्तिसंज्ञेसर्वरूपाभवंति गुणप्रधानभावकृतस्त्वेषां
विशेषइति तस्मादुःखमेवसर्वंविवेकिनइति। तदस्यमहतोदुःखस्यमुदासस्य प्रभवबीजमविद्या
तस्याश्चसम्यग्दर्शनमभावहेतुः यथाचिकित्साशास्त्रंचतुर्व्यूहंरोगोरोगहेतुरारोग्यंभैषज्यमित्येवमि

दर्शनशक्त्योरित्युच्यते तत्र यथा संस्कारः संसारहेतुः मोक्षो मोक्षोपायश्च वक्ष्यति तत्र दुःखबहुलः संसारो हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः संयोगस्यात्यन्तिकी निवृत्तिर्हानं हानोपायः सम्यग्दर्शनं तन्निबन्धनः स्वरूपमुपादेयं यथा वक्ष्यति हानमस्यापि दुःखस्य हेयमित्यभिधीयते ॥१५॥ हेयं दुःखमनागतं ॥१६॥ दुःखमतीतमुपभोगेनात्यवाहितं नहेयपक्षेवर्तते वर्तमानं च स्वक्षणोपभोगरूढमिति ननु क्षणान्तरे हेयतामापद्यते तस्माद्यदवाना गतं दुःखं तदवाप्तिपत्रकल्पं योनिनं लिङ्गमात्रं नेतरं प्रतिपत्तारं नदेव हेयतामापद्यते ॥१५॥ तस्माद्यद्वयदेव हेयमित्युच्यते तस्येदं कारणं प्रतिनिर्दिश्यते दृष्टृदृश्ययोः संयोगो हेयहेतुः ॥१७॥ दृष्टा बुधेः प्रतिसंवेदी पुरुषः। दृश्या बुद्धिसत्त्वोपसर्जनाः सर्वे धर्मेः तदेतत् दृश्यमयस्कान्तमणिकल्पसन्निधिमात्रोपकारि दृश्यत्वेन पुरुषस्य स्वं भवति दृशिरूपस्य स्वामिनः अनुभवकर्मविषयतामापन्नमन्यरूपेणप्रतिपन्नं अन्यरूपेणप्रतिलब्धात्मकं स्वतन्त्रमपि परार्थत्वात् परतन्त्रं तया दृग्दृश्यशक्त्योरनादिकृतः संयोगो हेयहेतुः दुःखस्य कारणमित्यर्थः। तथा चोक्तं तत्संयोगहेतुविवर्जनात्स्यादयमात्यन्तिको दुःखप्रतीकारः कस्मात् दुःखहेतोः प्रतिकार्यस्य प्रतीकारदर्शनात्। तद्यथा पादतलस्थभेद्यता कंटकस्य भेदनं तत्त्वं परिहारः कंटकस्यापादनाधिष्ठानं पादत्राणवृक्षिनवाधिष्ठानं एतत्त्रयं येनेदं लोके सत्तत्र प्रतीकारमापन्नमिदं दुःखं नाप्नोति कस्मात् त्रित्वोपलब्धेः सामर्थ्यादिति। अत्रापि तापकस्य रजसः सत्त्वेनानुत्पत्त्यै तस्मात्तापक्रियायाः कर्मस्थत्वात् सत्त्वे कर्मणि तापक्रियानापरिणामिनि निष्क्रियेऽत्रैवंशीलविषयत्वात्। सत्त्वेनुत्पद्यमानेनदाकारानुरोधी पुरुषोप्यनुत्पन्नवृत्तिरिति ॥१७॥ दृश्यस्वरूपमुच्यत इति ॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं ॥१८॥ प्रकाशप्रीतिसत्त्वक्रियाप्रीतिरजःस्थितिप्रीतिस्तमइति एते गुणाः परस्परोपरक्तप्रविभागाः परिणामिनः संयोगवियोगधर्माणश्चान्योन्यापाश्रयेणोपार्जितमूर्तयः परस्परांगांगित्वेप्यसंभिन्नभक्तिप्रविभागास्तुल्यजातीयातुल्यजातीयशक्तिभेदानुपातिनः प्रधानवलायमुपरक्तिसन्निधानाः गुणत्वेपि व्यापारमात्रेण प्रधानान्तर्गतानुमितात्मानः पुरुषार्थकर्तव्यतया प्रयुक्तसामर्थ्यासन्निधिमात्रोपकारिणोयस्कान्तमणिकल्पाः अस्यमंतरेणैकतमस्य वृत्तिमनुवर्तमानाः प्रधानवद्व्यक्तवंति तदस्यचित्सुच्यते तदेतद्दृश्यात्मकं भूत

भावेनपृथिव्यादिनासूक्ष्मस्थूलेनपरिणमते। तथेंद्रियभावेनश्रोत्रादिनासूक्ष्मस्थूलेनपरिणमतइति त
नुनाप्रयोजनंप्रयोजनेनुरिकृत्यप्रवर्तमानइतिभोगापवर्गार्थंहिदृश्यंपुरुषस्येति।तत्रेष्टानिष्टगुणस्व
॥२८॥ रूपावधारणमविभागापन्नं भोगेभोक्तुःस्वरूपावधारणमपवर्गइति। द्रष्टाद्रष्टारूपमन्यदृश्यंनान्य
दिति।तथाचोक्तं। अयंतुत्रिगुणोऽकर्तेतिकूटस्थनित्यःपुरुषस्तुल्यातुल्यजातीयैश्चगुणैर्नक्रियासा
क्षिण्यूपनीयमानान्सन्निधावनुपपन्नान्ननुपश्यन्नदर्शनमन्यत्पश्यतीति।तावेतौभोगापवर्गौबुध ॥२८॥
कथंच्च कृतौबुधावेववर्तमानौपुरुषव्यपदिश्येतइति।।तथाविजयःपराजयोवाभोक्तृषुवर्तमानस्वामिनि
व्यपदिश्यतेसहितत्फलस्यभोक्तेति।एवंबंधमोक्षौबुधावेववर्तमानौपुरुषव्यपदिश्येतइति बुधे
रेचपुरुषस्यापिसिद्धाविंद्रियः तदधिवासोमोक्षइति एतेनग्रहणधारणोहापोहतत्वज्ञानाभिनिव
शाबुधेपुरुषेवर्तमानाःपुरुषेध्यारोपितस्वभावाःसहितत्फलस्यभोक्तेति॥२८।द्रष्टृदृश्यगुणानांस्व
रूपभेदावधारणार्थमिदमारभ्यतेविशेषाविशेषलिंगमात्रालिंगानिगुणपर्वाणि।।२९।। तत्राकाशादा
रभ्यभूतान्यविशेषास्यशब्दतन्मात्राणांअविशेषाणांविशेषाः तथाश्रोत्रत्वक्चक्षु

जिह्वाघ्राणानिबुद्धींद्रियाणि वाक्पाणिपादपायूपस्थाःकर्मेंद्रियाण्येकादशंमनःसर्वार्थमित्येतानि अ
स्मितालक्षणस्याविशेषस्याविशेषाःगुणानामेषोऽणुरेकोविशेषपरिणामःकउविशेषाः तद्यथाशब्दतन्मात्रं
स्पर्शतन्मात्रंरूपतन्मात्रंरसतन्मात्रंगंधतन्मात्रंचेतिएकद्वित्रिचतुःपंचलक्षणाःशब्दाद्यःपंचाविशे
षाःषष्ठश्चाविशेषोऽस्मितामात्रस्यैतेसतामात्रस्यात्मनोमहतःषडविशेषपरिणामःयेत्यमविशे त५
त५ षेभ्योलिंगमात्रंमहतश्चत्वारिसन्निवेशसतामात्रेमहत्यात्मनिअवस्थायावदधिकालमनुपलं
भंप्रतिसंक्रम्यमाणाभ्यन्तरेणैवसतामात्रेमहत्यात्मनेनस्थायतानिःसत्तासंनिःसदसद्व्यक्त
म७ मलिंगंचानंतमलिंगेतिसौएषतेलिंगमात्रःपरिणामोनिसत्तालक्षणंचालिंगपरिणामइति अलिंगा
वस्थायांपुरुषार्थेनिहेतुःनालिंगावस्थाआदौपुरुषार्थताकारणंभवतीति नतस्याःपुरुषार्थताका
रणंभवतीतिनसैपुरुषार्थकर्तेतिनित्यख्यायते त्रयाणांत्ववस्थाविशेषाणांआदौपुरुषार्थताकार
णंभवतीति।सचायंहेतुर्निमित्तकारणंभवतित्यनित्याख्यायते गुणास्त्वसदेवंधर्मानुपातिनोन
ह्यत्यंतमृषं तेनोपजायंतेव्यक्तिभिरेवातीतानागतव्यवहारभवतीर्गुणाश्चपिंडीभूतपंजनापा

यधर्मकाश्चैवमत्यवधार्यन्ते। यथादेवदत्तोदरिद्राति कस्माच्चैतस्यविनिश्चीयतेगावरतिगवामेवप्रसवात्
स्यदृष्टाणांनत्वरूपज्ञानादितिसमः समाधिः लिंगमालिंगस्यप्रत्यासंनंतत्तत्संसृष्टंविविच्यतेऽनेकमु
निवृत्तेः तथाषडविशेषाःलिंगमात्रसंसृष्टाविविच्यंते तथाचोक्तं पुरस्तात् नविशेषेभ्यः परंतत्त्व
न मस्तीतिविशेषाणांनास्तित्वांतरमपरिणामः तेषांधर्मलक्षणावस्थापरिणामाव्याख्यायि
ष्यंते। व्याख्यातंदृश्यमथद्रष्टुःस्वरूपावधारणार्थमिदमारभ्यते।।२९।। द्रष्टादृशिमात्रः शुद्धोपिप्रत्य
यानुपश्यः।।२०।। दृशिमात्रइतिदृक्शक्तिरेवविशेषणाद्रामष्टेत्यर्थः सपुरुषोबुधेःप्रतिसंवेदी सबु
धेनसरूपोनालंतविरूपइति। नतावत्सरूपः कस्मात् ज्ञाताज्ञातविषयित्वात् परिणामिनीहिबुधिस्त
स्याश्चविषयोगवादिर्घटादिर्ज्ञातश्चेतिपरिणामित्वंदर्शयति। सदाज्ञातविषयत्वंपुरुषस्याप
रिणामित्वंपरिदीपयति। कस्मात् नहिबुधिश्चनामपुरुषविषयश्चस्माद्दृष्टाहृष्टानचलिसि
धंपुरुषस्यसदाज्ञानविषयत्वं। तत्श्चापरिणामित्वमिति। किंचपरार्थबुधिः संहत्यकारित्वात्
स्वार्थःपुरुषइति। तथासत्यधिष्ठायकत्वात् त्रिगुणाबुधिः त्रिगुणकारित्वात्अचेतनेनित्यं

॥२९॥

॥२९॥

णानांतुपरार्थःपुरुषस्यतोनसरूपः अस्तुवाहिविरूपइतिनांतविरूपः। कस्मात् शुद्धोप्यसौप्रत्यया
नुपश्यो यत्प्रत्ययंबोधमनुपश्यतिनमनुपश्यन्ननदात्मापितदात्मकत्वंप्रसक्तंप्रसक्तेत। तथाचोक्तं अप
रिणामिनीहिबोधरूपाकृतिरप्रतिसंक्रमाच्चपरिणामिन्यर्थेप्रतिसंक्रांतेवनहतिमनुपनति। तस्माच्चप्राप्त
चैतन्योपग्रहरूपायाःबुधिवृत्तेरनुकारमात्रतयाबुधिवृत्त्यावशिष्टाहिरित्याख्यायते।२०। तदर्थएवदृ
श्यस्यात्मा।।२१।। दृशिरूपस्यपुरुषस्यकुमरूपविषयनामापन्नंछयामिति। नदर्थएवदृश्यस्यात्मास्व
तिस्वरूपंभवतितत्वर्थः तत्सरूपंतुपररूपेणप्रतित्वात्मकंभोगापवर्गयोर्नामकृतायांपुरुषेननदृश्यतइति।।२१।।
स्वरूपहानादस्यनाशःप्राप्तेनतुविनश्यति कस्मात् कृतार्थप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वात्।।२२।।
कृतार्थमेकंपुरुषंदृश्येनरूपेणनाशंप्राप्तमप्यनष्टं। तदन्यपुरुषसाधारणत्वात् कुतश्चपुरुषंप्रतिनाशं
प्राप्तमप्यकुतश्चिदपुरुषान्प्रतिनवृत्तार्थमित्तेषांदृश्यःधर्मविषयलाभपेक्षंतत्वभवत्येवपररू
पेणात्मरूपमिति। अतश्चद्रष्टृदृश्यनिरूपणार्थत्वात् अनादिसंयोगोव्याख्यातइति। तथाचोक्तं
धर्मिणमनादिसंयोगधर्मान्माणामप्यनादिःसंयोगइति।।२२।। संयोगस्वरूपाभिप्रायेदंसूत्रं

प्रवर्तते। स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः॥२३॥ पुरुषस्याभिदर्शनेन स्वदर्शनार्थं संयुक्तः।
तस्मात् स्वरूपैगात् दृश्यस्योपलब्धीयभोगः मानुदृष्टः स्वरूपोपलब्धीः सोपवर्गः। दर्शनकार्यानेसा
नः संयोगः इति दर्शनवियोगस्यकारणमुक्तं दर्शनस्यप्रतिद्वंद्वित्वं दर्शनसंयोगनिमित्तमुक्तं॥ नात्र
दर्शनमोक्षकारणं अदर्शनभावादेवबंधाभावः सएवमोक्षइति। दर्शनस्याभावेबंधकारणस्यादर्श
नस्यनाशात्ततो दर्शनज्ञानं केवलंकारणमुक्तं किंचेदमदर्शनं नामकिंगुणानमधिकारः। अहो
स्वित् दृशिरूपस्यस्वामिनोदर्शनविषयप्रधानचेतस्यनुत्पादः स्वस्मिन्दृश्यधिष्ठीयमानोयोद
र्शनाभावः किमथवातगुणानां। अथाविद्यास्यचित्तेनसहनिरुद्धास्यचित्तस्यतत्रबीजं किंस्थि
तिसंस्कारक्षयेणनिसंस्कारभित्तः व्यक्तिः यत्रेदमुक्तं प्रधानंस्थित्यैवर्त्तमानंविकाराकारणाद्
प्रधानंस्यातउक्तंयथाचास्यंवृत्तिः प्रधानव्यवहारंलभते नान्यथाकारणांतरेणापिविक
ल्पिनेपुरुषसमानश्चार्थश्चेः। दर्शनशक्तिरेवादर्शनमित्येकेप्रधानस्यात्मख्यापनार्थंप्र

वृत्तिरितिकुत्तेः। सर्वबोध्यबाधसमर्थः प्राक्प्रवृत्तेः पुरुषेनदृश्यन्तिसर्वकार्यकारणसमर्थदृश्यंतइति
उभयस्याप्यदर्शनंधर्मइत्येके तत्रदृश्यस्वरूपस्यात्मभूतमपिपुरुषप्रत्ययापेक्षंदर्शनंदृश्यधर्म
त्वेनभवतितथापुरुषस्यानात्मभूतमपिदृश्यप्रत्ययमपेक्ष्यपुरुषधर्मत्वेनेवादर्शनमवभासतेदर्शनं
ज्ञानमेवादर्शनमिति केचिदभिदधति इत्येतन्नात्मगताः विकल्पाः तत्राविकल्पबहुत्वेसतत्
सर्वपुरुषाणांगुणानांसंयोगेसाधारणविषयं। यस्तुप्रत्यक्चेतनस्यसबुधेःसंयोगः॥२३॥ तस्य
हेतुरविद्या॥२४॥ विपर्ययज्ञानवासनेत्यर्थः विपर्ययज्ञानंयासनावासितानकार्यानिष्ठांपुरु
षख्यातिंबुधेः। प्राप्नोतिति। साधिकारापुनरावर्त्तते सानुपुरुषख्यातिपर्यवसानांकार्यनिष्ठं
प्राप्नोति॥ चरितार्थाधिकारानिवृत्तादर्शनबंधकारणभावान्पुनरावर्त्तते सानुपुरुष
ख्यातिः॥ अत्रकश्चिन्पंडतोपाख्यानेनोद्घाटयति मुग्धयाभार्यायाभिधीयतेपंडकआर्यपुत्रअपत्य
तिमभगिनिकिमर्थंनाहमिति। सत्तामाहमृत्तस्तेहमपत्यमुत्पादयिष्यामीति। तथेदंविप्र
मानंज्ञानंचित्तनिवृत्तिंनकरोतिविनष्टंकरिष्यतीति। काप्रत्याशात्तन्नाचार्यदर्शनियोवक्तिः। ननु

बुद्धिनिवृत्तिरेव मोक्षोऽदर्शनकारणाभावात् बुद्धिनिवृत्तिः तच्चादर्शनं बंधकारणं दर्शनान्निवर्तते
तन्निवृत्तिरेव माधवः किमत्र मिथ्यानदर्शनस्यमिति विभ्रमः। हेयं दुःखं हेयकारणं च संयोगा
ख्यं निमित्तमुक्तं अतः परं हानं वक्तव्यं॥२४॥ तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यं॥२५॥
तस्या दर्शनस्याभावात् बुद्धिपुरुषसंयोगाभावः आत्यंतिको बंधनोपरमस्तस्यार्थः। एतद्धानं तत्
दृशेः कैवल्यं पुरुषस्यामिश्रीभावः पुनरसंयोगेन गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो
हानं तदा स्वरूपप्रतिष्ठः पुरुष इत्युक्तं॥२५॥ अथ हानकः आसुपायइति॥२६॥ विवेकख्यातिरविप्लवा
हानोपायः॥२६॥ सत्त्वपुरुषान्यताख्यातेर्विवेकख्यातिः। सत्त्वनिवृत्तमिथ्याज्ञानाप्रलयेतदा मि
थ्याज्ञानदग्धबीजभावं बंधप्रसवं संपद्यते तदाविप्लवैकरजसः सत्त्वस्यपरेधेयारूपे परस्यां
वशीकारसंज्ञायां यावत्मानस्य विवेकप्रत्ययप्रवाहो निर्मलोभवति सा विवेकख्यातिरविप्लवा हानो
पायः ततो मिथ्याज्ञानस्य तानदग्धबीजभावेपि मः पुनः श्राम्नसवरसेन प्रोत्थस्य मार्गोहानस्योपायः इति॥२६॥ तस्यसप्त
प्रांतभूमिप्रज्ञा॥२७॥ तस्येतिप्रत्युदितख्यातेः प्रसाद्यावश्यसप्तधेति अधुभावरणमलापगमात् चित्तस्यमलंकातरा

नुत्पादेसतिसत्त्वप्रकारेवप्रज्ञाविवेकेनोभवति। तद्यथा। परित्राणं हेयंनास्यपुनः परिहेयमस्तिक्षीणाहे
यहेतवानपुनरेषांक्षेतव्यमस्तिसाधनात् कृतंनिरोधसमाधिनाहनं भावितोविवेकख्यातिरूपेहा
नोपायइत्येतच्चतुष्टयीकार्यानिमुक्तिःप्रज्ञायाः चित्तविमुक्तिरूपत्रयीचरिताधिकारावुद्धि
गुणाः गिरिदुरवरकूट-च्युतारवयोवाणीनिस्वस्थानाः स्वकारणेप्रलयंयास्यंतिपुरुषाः सहनानात्व
गर्भलिनैषांविप्रलीनानां पुनरस्युत्पादः पुरुषोजनाभावादिति। एतस्यांप्रज्ञायांगुणसंबंधा
धिकारः स्वरूपमात्रज्योतिरमलः केवलीपुरुषइतीयंसत्त्वविदांप्रातभूमिप्रज्ञामनुपश्यन्पुरुषः
कुशलइत्याख्यायते। प्राप्तिप्रसंख्यापूर्वकचित्तस्यमुक्तः कुशलइत्येवंनिर्गुणाचित्तत्वादि
तिसाध्यभवतिविवेकख्यातिर्हानोपायइति नच्चासाध्यंतरेणसाधनमित्यतस्तदारभ्यते॥२७॥
योगांगानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेः॥२८॥ योगांगान्यष्टावधिधाधिक्ष्यमाणा
नितेषामनुष्ठानात्पंचपर्वणिविपर्ययस्याशुद्धिरूपस्यक्षयोनाशः। तत्क्षये सम्यक्ज्ञानस्या
भिव्यक्तिः यंयमंयाचसाधनमनुष्ठीयते तथातत्तत्पशुभेरापद्यतेयथायथाच

क्षियते तथातथाक्षयक्रमानुरोधिनीज्ञानस्यापिदीप्तिर्विवर्धते। सावत्तेषांविवृद्धिःप्रकर्षमनुभवति आविवेकख्यातेः आगुणपुरुषस्वरूपविज्ञानादित्यर्थः। योगांगानुष्ठानमशुद्धेर्यो गकारणंयथापुंसः क्षेत्रस्यविवेकख्यातिस्तुप्राप्तिकारणंयथाधर्मसुखस्यनान्यथाकारणं। कति चैतानिकारणानिशास्त्रेभ्यंतिनवेत्याह।तत्रयथा। उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्यया ॥ १।२३॥
त्ययः। वियोगात्मत्वंचतुर्थः। कारणंत्रयोस्यतन्निमित्तोत्पत्तिकारणंमनोभवतिज्ञानस्य स्थितिकारणंमनसःपुरुषार्थतांशरीरस्येचाहारइति। अभिव्यक्तिकारणंरूपस्यालोकः तथास्व रूपज्ञानंविकारकारणंमनसेविषयांतरं॥ यथाग्निःपाकस्य।प्रत्ययकारणंधूमज्ञानमग्नेर्ज्ञा नस्य। प्राप्तिकारणंयोगांगानुष्ठानंविवेकख्यातेः। वियोगकारणंतदशुद्धेः। अन्यत्वका रणंयथासुवर्णस्यसुवर्णकारणमेवैकस्यान्यत्वेप्रत्ययस्यजातिमात्रत्वेद्वेषोदुःखत्वेरागः सुखत्वे। तत्वज्ञानमाध्यस्थे। धृतिकारणंशरीरेंद्रियाणां।तानिचतस्यमहाभूतान्याशरी राणां।तानिचपरस्परंसर्वेषांतिर्यग् योनिमानुषदेवतानिच परस्परार्थत्वादित्येवंनवकारणानि।

तानिचयथासंभवमदृष्टंतिरेषांविषयेऽतानियोगांगानुष्ठानंतद्विघातेवकारणत्वंनभजतइति॥२८॥
तत्रयोगांगान्यवधार्यंते यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाधयोऽष्टावंगानि॥२९॥
यथाक्रममेषामनुष्ठानंस्वरूपंचवक्ष्यामः॥३०॥ तत्रअहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहयमाः॥३१॥
तत्राहिंसासर्वथासर्वभूतानामनभिद्रोहः।उत्तरेचयमनियमास्तन्मूलास्तत्सिद्धिपरतयेन तत्प्रतिपादनायप्रतिपाद्यते। तदयदातत्स्वरूपकारणमेवउपादीयंते। तथाह्युक्तंसत्यंवाच्यमि त्यत्रयथायथावाचानियतंसमादित्सतेतथातथाप्रमादकृतेभ्योहिंसानिदानेभ्योनिवर्त्तमान स्तामवावदातरूपामहिंसांकरोति। सत्यंतथार्थेविज्ञातुंमनसेप्सितंयथादृष्टंयथानुमितंयथाश्रुतं यथावाऽऽत्मन्यनिपुणैरवबोधसंक्रांतयेयउक्तास्तथाभावार्थेदितवंचितांभ्रांतावाप्रतिपत्तिंवि ध्याभवेत् इत्येतत्सत्यंभूतोपकारार्थंप्रवृत्तंभूतोपघातायं॥ यदिह्येवमप्यभिसंधीयमानं भूतोपघातनैवस्यान्नसत्यंभवेत् पापमेवभवेत्॥ तेनपुण्याभासंनपुण्यप्रतिरूपकेनकष्टं तमःप्रतियात् नत्वात्मारक्ष्यसर्वभूतहिंसांकुर्यात्। सेयमशास्त्रपूर्वकंद्रव्याणांपरतः

स्वीकरणं नूत्प्रतिषेधः पुनस्पृहारूपमस्तेयमिति॥ ब्रह्मचर्यगुप्तेन्द्रियस्योपस्थस्य संयमः। वि
षयाणामजनरक्षणक्षयसंगहिंसादोषदर्शनादस्वीकरणमपरिग्रहस्थैर्येयमः॥३०॥ नैतज्जा
तिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्॥३१॥ तत्राहिंसाजातिावच्छिन्नाःस्वविषयस्यबंध
कस्य वत्सयेष्वनान्यत्राहिंसा। देशानवच्छिना। नातिथेहनिष्यामीति। सैवकालावच्छिन्ना नच
तुर्दश्यांनपुण्येहनीतिसैवत्रिभिरुपरतस्य समयावच्छिन्नादेवब्राह्मणार्थेनान्यथाहनिष्यामीति॥
यथाचक्षत्रियार्थंयुद्धएवहिंसानान्यत्रेति। एभिर्जातिदेशकालसमयैरनवच्छिन्नाअहिंसादयःसर्वविषयाःसार्वभौमाः
सर्वभूमिषुसर्वविषयेषुसदृशैर्यावदितव्यभिचाराः सार्वभौमाःमहाव्रतमित्युच्यते॥३२॥ शौ
चसंतोषतपःस्वाध्यायेश्वरप्रणिधानानियमाः॥३२॥ तत्रशौचंमृज्जलादिजनितमेध्यानामृद्य
वहरणादिनुद्भूतंआभ्यंतरंचित्तमलक्षालनं। सतोषःसंन्निहितसाधनादधिकस्यानु
पादित्सा। तयोर्दृढसहनंद्वंद्वान्यजिघत्सापिपासेशीतोष्णस्थानासनेजयश्चानिचैवंयथा

योगंकुर्य्यु चांद्रायणसांतपनादीनि। स्वाध्यायोमोक्षशास्त्राणांअध्ययनं प्रणवजपोवा स्थिरप्रणि
धानंतस्मिन्परमगुरौसर्वकर्मार्पणं। शयासनस्थोयथेष्टंब्रह्मध्यानेस्वस्थःपरिक्षीणवितर्कजालः।
संसारबीजक्षयमीक्षमाणःस्यान्निर्मलमुक्तेरुत्तमोभागभागी। यत्रेदमुक्तं ततःप्रत्यक्चेतनाधि
गमोप्यंतरायाभावश्चेति॥ एतेषांयमनियमानां॥३३॥ वितर्कयाधेनप्रतिपक्षभावनं॥३३॥ यदा
स्यब्राह्मणस्यहिंसादयोवितर्कजायेरन्हिंस्याम्यहमपकारिणमनृतमपिवक्ष्यामिद्रव्यमपि
अन्यस्यस्वीकरिष्यामिदारेषूपास्यव्यभिचारिष्यामिपरिग्रहंचोपास्यास्यामीमंविघ्स्यामीति
एवमुन्मार्गप्रवणावितर्कद्वारेणातिदीर्घेनबाध्यमानस्तत्प्रतिपक्षान्भावयेत्। घोरेषुसंसारांगारेषुपच्य
मानेनमयाशरणमुपागतःसर्वभूताभयप्रदानेनयोगधर्मःसखल्वयंयत्त्वंवितर्कानु पुनस्तानाददानस्तुल्यःश्वपचेनेतिभावयेत्। तथाश्ववाधीतावलेहितधात्पक्वस्यपुनरादानवदिति एवमा
दिसूत्रांतरेष्वपियोज्यं॥३३॥ वितर्कहिंसादयःकृतकारितानुमोदितालोभक्रोधमोहपूर्विकामृ

॥२४॥

दुमध्याधिमात्रादुःखाज्ञानानंतफलाइतिप्रतिपक्षभावनं॥३४॥ तत्रहिसातावत्कृतकारितानु
मोदितेतित्रिधा॥एकैकपुनस्त्रिधा लोभनमासचमर्थिनं। क्रोधनअपकृतमनेनेति मोहनध
र्मिभविष्यतीति।लोभक्रोधमोहाः पुनस्त्रिधा मृदुमध्याधिमात्राइत्येवंसप्तविंशतिभेदाःभव
न्ति हिसायाः॥मृदुमध्याधिमात्राः पुनस्त्रिधा। मृदुमृदुः मध्यमृदुः तीव्र मृदुरिति।तथामृदुमध्याम
ध्यमध्यस्तीव्रमध्यइतितथामृदुतीव्रो मध्यतीव्राधिमात्रस्तीव्रइति।एवमेकाविंशतिभेदा भवतिहि
सायाभवन्ति॥सापुनर्नियमविकल्पसमुच्चयभेदाद्असंख्येया प्राणभृद्भेदस्यापरिसंख्येयत्वादिति
एवमनृतादिष्वपियोज्यंते स्वत्वमीदृक्तर्कदुःखाज्ञानानंतफलाइतिपक्षभावनं॥दुःखमज्ञानंच
नंतफलंयस्यामितिप्रतिपक्षभावनं।तथाचहिसकः अयमंतावत् वध्यस्यधर्मिमाक्षिपति त
स्यशस्त्रादिनिपातनदुःखयति ततोजीविताद्पिभ्रंशयति॥ततोविपर्ययेणादस्य
चेतनाचेतनमुपकरणंक्षीणवीर्यंभवंतिदुःखोत्पादनक्षमंकतिपयेष्वेवादिषुदुःखमनुभवंति।जीवि
तव्यपरोपणाद्प्रतिपक्षणंचजीवितात्ययमरणमनिष्टमपि॥दुःखविपाकस्यनियतत्वेऽनिय

॥२४॥

त्वात्।कथंचिद्वोच्यासिति।यस्त्वेवंचिंतयेत्मुख्यावागुप्तिर्हिसाभवेत्।तत्रसत्यप्यसौभवेदित्यपरिति।एवमनृतादि
षुयोज्यंयथासंभवं॥एवंवितर्काणांचानुमेवानुगतविपाकमनिष्टंभावयन्वितर्केषुमनःप्रणिदधीतप्रतिपक्षभाव
नाहेतोर्हेयावितर्काः।यदास्यस्मरंप्रसवधर्माणस्तदातत्कृतमैश्वर्ययोगिनःसिद्धिसूचकंभवति।तद्यथा अहिंसा
प्रतिष्ठायां॥३४॥ तत्संन्निधौवैरत्यागः॥३५॥ सर्वप्राणिनांभवतिसत्यश्रुतिष्ठायां क्रियाश्रयत्वं।धार्मिकोभूयासमितिभ
वतिधार्मिकःस्वर्गंप्राप्नुहितिस्वर्गप्रापीति।अमोघास्यवाग्भवति यत्तेयप्रतिष्ठायांरत्नोपस्थानं।सर्वरत्नान्यस्य
उपतिष्ठंतेरत्नानिप्रत्यर्पयंतिप्रतिष्ठायां।वीर्यलाभः।यस्यलाभाद्प्रतिष्ठानुत्कर्षयति सिध्यत्व दिनेषुज्ञान
माधातुंसमर्थोभवति।अपरिग्रहस्थैर्येजन्मकथंतासंबोधं अस्यभवति कोहमासं कथमहमासं कीदृशिदंकेवलंवि
द्यामः कथंवाभविष्यामः इत्येवमस्यपूर्वापरांतमध्येषुत्मभावंजिज्ञासास्वरूपेणोपावर्तते एतायमस्थैर्यसिध्यः॥३५॥ नियम
मेषुवक्ष्यामः शौचात्स्वांगजुगुप्सापरैरसंसर्गः॥३६॥ स्वांगेजुगुप्सायांशौचमारभमाणः कायानुपश्यदशौचं कायान
भिष्वंगिनीतिभवतिकिंचपरैरसंसर्गः कायस्वभावावलोकिस्वमपिकायंजिहासुर्मृत्वात्मादिभिराकृष्टात्मयत्नमपिपश्य
यशुचिमपश्यन्कथंपरकीयैरंगैर्नमेवाग्रयतेसंसर्ग ज्येत॥३६॥ किंच। सत्त्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मद

वृत्तिनियोज्यत्वान्निच्च॥३७॥ भवंतीति वाक्यशेषः। शुचेः सत्वशुद्धिः ततः सौमनस्यं ततश्चैकाग्र्यं ततश्चेंद्रियजयः ततश्च बलादवृत्तिनियोज्यं बुद्धिसत्वस्य भवतीति एष तावत्क्लेशकर्मनिवृत्तये योगः परिदृश्यमानदृष्टे॥३७॥ संतोषादनुत्तमः सुखलाभः॥३८॥ यथोक्तेभ्यः साधनेभ्यः यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामपि॥३९॥ कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः॥४०॥ निवर्त्तमानमेवतपोहिनस्त्यशुद्धिं नावरणमलंतदावरणमलापगमात्कायसिद्धिरणिमाद्यधिष्ठानादृद्धिसिद्धिदूरश्रवणमननाद्येति॥४१॥ स्वाध्यायादिष्टदेवतासंप्रयोगः॥४२॥ देवाभ्रमर्षयसिद्धाश्चास्यां प्रज्ञायां लिप्स्यंतइत्यनर्थकांक्षयेन्द्रियजयं लप्स्यंत इति॥४३॥ समाधिसिद्धिरीश्वरप्रणिधानात्॥४४॥ ईश्वरार्पितसर्वभावस्यसमाधिसिद्धिर्यथासर्वमीश्वरप्रणिधानान्निष्पद्यतइतिवक्तव्यं जानाति। देशांतरेदेहांतरेकालांतरेचननस्यभ्रष्टा यथाभूतंप्रजानातीति। उक्ताः सहसिद्धिभिर्यमनियमाः॥४५॥ आसनादीनिवक्ष्यामः॥ तत्रास्थिरकस्यासनम्॥४६॥ तद्यथा। पद्मासनं वीरासनंभद्रासनंस्वस्तिकंदंडासनंसोपाश्रयंपर्यंकंक्रौंचनिषदनंहस्तिनिषदनंउष्ट्रनिषदनंसमसंस्थानं स्थिरसुखंयथासुखंचेत्येवमादि॥४७॥ प्रयत्नशैथिल्यानंतसमापत्तिभ्यांप्रभवतीतिवाक्यशेषः॥ प्रयत्नोपरमात्सिध्त्यासनंयेननांगमेजयोभवति। अनंतेवासमापन्नंचित्तमासनंनिवर्तयतीति॥४८॥ ततोद्वंद्वानभिघातः॥४९॥ तस्मिन्सतिश्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥५०॥ सत्यासनजयेबाह्यस्याभ्यंतरस्यवायोराचमनंश्वासः कोष्ठ्यवायोर्निश्चारणंप्रश्वासः तयोर्गतिविच्छेदः उभयाभावः प्राणायामः॥५१॥ सनुबाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टोदीर्घसूक्ष्मः॥५२॥ यत्रश्वासपूर्वकोगत्यभावः स्मबाह्यः यत्रप्रश्वासपूर्वकोगत्यभावः स्वाभ्यंतरः तृतीयस्तंभवृत्तिः यत्रोभयाभावः सकृत्प्रयत्नाद्भवति यथातप्तेनलसकयत्तज्जलंसर्वतः संकोचमापद्यते तथाबाह्योयंगपदगत्यभावद्वानि तत्रयोप्येतदेशेनपरिदृश्यानुयानस्यविषयोदेशेनपरिदृश्यते कालेनसंख्याभिः परिदृश्यमानाबाह्याभ्यंतरस्तंभवृत्तिर्दीर्घसूक्ष्मः प्रथमउद्घातस्तद्विनिर्हीनस्यैतावद्भिर्द्वितीयउद्घात एवंतृतीयः पंचमद्वादशमध्यःसप्तदशेत्यनुद्घातः

DR BEAR

संख्यापरिदृष्टः सत्वलघ्वभ्यस्तोदीर्घसूक्ष्मः॥५३॥ बाह्याभ्यंतरविषयोपेक्षीचतुर्थः॥५४॥ देशकालसंख्याभिर्बाह्यविषयपरिदृष्टआक्षिप्तः। अभ्यंतरपरिदृष्टविषयआक्षेपी। उभयथापि सूक्ष्मस्तत्पूर्वकोभूमिजयात्। क्रमेणाभ्यासेनगत्यभावश्चतुर्थः प्राणायामस्तत्तत्वीयुक्तविषयानालोचितेतरस्वभावःसकृदारब्धएवदेशकालसंख्याभिःपरिदृष्टोदीर्घसूक्ष्मश्चभवतिस्तंभवृत्तिस्त्रिस्थानश्चतुर्थस्तुस्तंभवृत्तिर्बाह्याभ्यंतरविषयानालोचितेतरस्वभावः सकृदारब्धएवदेशकालसंख्याभिःपरिदृष्टोदीर्घसूक्ष्मश्चभवतिच

योगभाष्यकारः प्रवर्तते ॥ योऽभ्यन्तरत्वं योगेनसह योगेऽन्तरङ्गमिति ॥ ६ ॥ तत्र यमेतरङ्गं पूर्वेभ्यः ॥ ७ ॥ तदेव धारणाध्याने समाधित्रयमन्तरङ्गं संप्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः
॥२६५॥ पञ्चभ्यः साधनेभ्यो इति ॥ ७ ॥ तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥ तदप्यन्तरङ्गं साधनं निर्बीजस्य योगस्य बहिरङ्गं भवति ॥ कस्मात्तस्माद्भेदाभावादिति ॥ अथ निरोधचित्तक्षण
योर्बलवत्त्वं गुणवृत्तयोर्मिमित्तिकी दशान्तरा चित्तपरिणामः ॥ ९ ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ १० ॥ व्युत्थानसंस्का
रचित्तधर्माः तेषामभिभवात्मकारतिप्रत्ययनिरोधेननिरुध्यन्ते ॥ निरोधसंस्काराऽपि चित्तधर्मत्वेनयोरभिभवप्रादुर्भावौतावद्व्युत्थानसंस्कारावाधीयेते ॥ निरोधक्ष
णचित्तमन्वेति ॥ तदेकस्यचित्तस्यप्रतिक्षणमिदंसंस्कारान्यथात्वंनिरोधपरिणामस्तत्संस्कारापेक्षः प्रत्यवस्थानं ९ तस्यप्रशान्तवाहितासंस्कारात् ॥ निरोधसं
स्काराभ्यासपाटवापेक्षाप्रशान्तवाहिता चित्तस्यभवति ॥ तत्संस्कारो मांद्यंव्युत्थानधर्मिणासंस्कारेणनिरोधधर्मसंस्काराभिभूयतइति ॥ ११ ॥ सर्वार्थतैकाग्र्ययोः क्षयोद
येचित्तस्यसमाधिपरिणामः ॥ ११ ॥ सर्वार्थता चित्तधर्मः सैवानायाऽक्षयः निरोधानुरक्तश्च ॥ एकाग्रतायाउदयआचिभावद्रव्यार्थः ॥ तयोर्धर्मित्वेनानुगतं
चित्तमिदंचित्तमथोपजनयोः स्वात्मभूतयोर्धर्मयोरनुगतंसमाधिनासमाधिचित्तस्यसमाधिपरिणामः ॥ १२ ॥ ततः पुनः शान्तोदितौतुल्यप्रत्ययौचित्तस्यैकाग्रतापरिणामः ॥ १२ ॥ स्मा
चित्तस्यपूर्वप्रत्ययः शान्तउत्तरस्तत्तत्संदृशउदितः ॥ समाधिचित्तमूभयोरनुगतपुनस्तथावासमथैक्येन ॥ सरूपत्वंधर्मिणश्चित्तस्यैकाग्रतापरिणामः ॥ १३ ॥ इतनभू
तेन्द्रियधर्मलक्षणावस्थापरिणामाव्याख्यातः ॥ १३ ॥ एतेनपूर्वोक्तेनचित्तपरिणामेनधर्मलक्षणावस्थापरिणामेषुभूतेन्द्रियधर्मपरिणामाल्लक्षणपरिणामाश्चनिरोधसमाधिचित्तस्य
णामप्येवमुक्तोवेदितव्यः ॥ तत्रव्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौधर्मिणोधर्मपरिणामेषुलक्षणपरिणामेश्चनिरोधक्षणचित्तस्य ॥ त्रिभिरध्वभिर्युक्तः ॥ स
त्वलक्षणमागतलक्षणमध्यानि हित्वाधर्मत्वमतिक्रांतोवर्तमानलक्षणग्रहणपन्नः यत्रास्यस्वरूपेणाभिव्यक्तिः ॥ तथास्य हितीयोध्वानचातिनागताध्वलक्ष
णाभ्यांविमुक्तः तथाव्युत्थाननिरोधलक्षणेभिरध्वभिर्युक्तः ॥ वर्तमानलक्षणहित्वाधर्मत्वमनतिक्रांतअतीतलक्षणंप्रतिपन्नं ॥ एवोस्यतृतीयोध्वानवा
नागतवर्तमानाध्वलक्षणाभ्यांविमुक्तः ॥ एवंपुनर्बुद्ध्यानमुपसंपद्यमानमतीतलक्षणंहित्वाधर्मत्वमनतिक्रांतं वर्तमानलक्षणंप्रतिपद्यतत्रास्यस्वरूपेणाभिव्यक्तो
सत्याव्यापारः एवोस्यहितीयाध्वानचातीतानागताध्वलक्षणाभ्यांविमुक्तइत्येवंपुनर्निरोधःएवंपुनर्व्युत्थानमिति ॥ तथावस्थापरिणामः निरोधक्षणेषुनिरोध
संस्कारबलवत्त्वंतोभवतिदुर्बलंव्युत्थानसंस्कारंदृष्ट्वेषधर्मर्णांत्रयवस्थाप्रपरिणामः ॥ तत्रधर्मिणोधर्मेपरिणामोधर्मधर्मिणोर्व्यवस्थानान्निरूपणेपरि ॥२६५॥
णामोलक्षणेष्वध्वस्थाभिःपरिणामादुर्बलधर्मलक्षणावस्थापरिणामैरव्युत्थानसंस्कारमिगुणवृत्तमवतिष्ठतेचलंचगुणवृत्तं ॥ गुणत्वाभावेतुअवतिष्ठते
कारणमुक्तो गुणानामिति ॥ एतेनभूतेन्द्रियेषुधर्मधर्मिभेदात्त्रिविधःपरिणामोवेदितव्यः ॥ परमार्थतस्त्वेकएवपरिणामोधर्मिस्वरूपमात्रोहिधर्मो

धर्मिविक्रियैवैषाधर्मद्वारानवंचतइति ॥ नन्वधर्मस्यधर्मिणिवर्तमानस्यैवाध्वातीतानागतवर्तमानेष्वभावान्न्यथात्वंभवति ॥ नक्तवर्णन्यथात्वमिति ॥ आचार्याह ॥ धर्मिण
व्यधिकोधर्मः ॥ पूर्वतत्त्वानिक्रमात्तुवर्तमानस्यान्यथाभेदानुपपत्तिः कोरस्थैर्यवैपरीत्ये ॥ तत्रयंन्यायोस्त्यादित्यमदोषः ॥ कस्मात् ॥ एकांतानभ्युपगमात् ॥ तं
दनपेक्षोकश्चिद्व्यक्तेरपेक्षोनित्यत्वप्रतिषेधादपेक्षमप्यनित्यविनाशप्रतिषेधात् ॥ संसर्गाच्चान्यसेक्ष्यसेक्ष्याच्चानुपलब्धिरिति ॥ लक्षणपरिणामोध
र्मेधिसकःवर्तमानेतीलक्षणयुक्तो नित्यत्वम् अनागतवर्तमानाभ्यांलक्षणाभ्यांवियुक्तः ॥ तथानागतोनागतलक्षणेयुक्तोतीतानागताभ्यां
लक्षणाभ्यांवियुक्तइति ॥ तथावर्तमानोवर्तमानलक्षणयुक्तोतीतानागताभ्यांलक्षणाभ्यांविमुक्तइतितथापुरुषएकस्यास्त्रियांरक्तोनद्वेषाक्रांतोविरक्तोभवतीति ॥ अत्र

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

योगभाष्य